# 92 - द्विनवतितम दशकम्
# कर्ममिश्र भक्तिः

वेदैस् सर्वाणि कर्माणि अफल परतया वर्णिता नीति बुध्वा
तानि त्वय्-यर्पितान्येव हि समनुचरन् यानि नैष्कर्म्य मीश ।
मा भूद्वेदैर् निषिद्धे कुहचिदपि मनः कर्म वाचां प्रवृत्तिः
दुर्वर्जं चे दवाप्तं तदपि खलु भवति अत्यर्पये चित् प्रकाशे ॥॥92-1॥

यस् त्वन्यः कर्म योगः तव भजन मयः तत्र चाभीष्ट मूर्तिं
हृद्यां सत्त्वैक रूपां दृषदि हृदि मृदि क्वापि वा भावयित्वा ।
पुष्पैर् गंधैर् निवेद्यैः अपि च विरचितैः शक्तितो भक्ति पूतैः
नित्यं वर्यां सपर्यां विदध दयि विभो त्वत् प्रसादं भजेयम् ॥ ॥92-2॥

स्त्री शूद्रास् त्वत् कथादि श्रवण विरहिताः आसतां ते दयार्हाः
त्वत् पादासन्न यातान् द्विज कुल जनुषो हंत शोचाम्यशांतान् ।
वृत्त्यर्थं ते यजंतः बहु कथित मपि त्वा मनाकर्णयंतः
दृप्ता विद्याभिजात्यैः किमु न विदधते तादृशं मा कृथा माम् ॥॥92-3॥

पापोऽयं कृष्ण रामे त्यभिलपति निजं गूहितुं दुश्चरित्रं
निर्लज्जस्यास्य वाचा बहुतर कथनीयानि मे विघ्नितानि ।
भ्राता मे वंध्य शीलो भजति किल सदा विष्णु मित्थं बुधांस्ते
निंदंत्युच्चैर् हसंति त्वयि निहित मतींस् तादृशं मा कृथा मां ॥॥92-4॥

श्वेत च्छायं कृते त्वां मुनिवर वपुषं प्रीणयंते तपोभिः
त्रेतायां स्रुक् स्रुवा द्यंकितं अरुण तनुं यज्ञ रूपं यजंते ।
सेवंते तंत्र मार्गैः विलस दरि गदं द्वापरे श्यामलांगं
नीलं संकीर्त नाद्यैः इह कलि समये मानुषास् त्वां भजंते ॥ ॥92-5॥

सोऽयं कालेय कालो जयति मुररिपो यत्र संकीर्तनाद्यै:
निर्यत्नै रेव मार्गै: अखिलद न चिरात् त्वत् प्रसादं भजंते ।
जातास् त्रेता कृतादौ अपि हि किल कलौ संभवं कामयंते
दैवात् तत्रैव जातान् विषय विष रसै: मा विभो वंचयास्मान् ॥॥92-6॥

भक्तास् तावत् कलौ स्यु: द्रमिल भुवि ततो भूरिशस् तत्र चोच्चै:
कावेरीं ताम्रपर्णी अनु किल कृत मालां च पुण्यां प्रतीचीम् ।
हा मामप्येत दंतर्भवं अपि च विभो किंचि दंचद्रसं त्वयि
आशा पाशैर् निबध्य भ्रमय न भगवन् पूरय त्वन् निषेवाम् ॥॥92-7॥

दृष्ट्वा धर्मद्रुहं तं कलि मपकरुणं प्राङ् महीक्षित् परीक्षित्
हंतुं व्याकृष्ट खड्गोऽपि न विनि हितवान् सारवेदी गुणांशात् ।
त्वत् सेवाद्याशु सिद्ध्येत् असदिह न तथा त्वत् परे चैष भीरु:
यत् तु प्रागेव रोगादिभि: अपहरते तत्र हा शिक्षयैनम् ॥ ॥92-8॥

गंगा गीता च गायत्र्यपि च तुलसिका गोपिका चंदनं तत्
सालग्रामाभि पूजा पर पुरुष तथैकादशी नाम वर्णाः ।
एतान्यष्टाप्य यत्नान्यपि कलि समये त्वत् प्रसाद प्रवृद्ध्या
क्षिप्रं मुक्ति प्रदानी त्यभि दधुः ऋषयस् तेषु मां सज्जयेथाः ॥॥92-9॥

देवर्षीणां पितृणां अपि न पुनर् ऋणी किंकरो वा स भूमन् ।
योऽसौ सर्वात्मना त्वां शरण मुपगत: सर्व कृत्यानि हित्वा ।
तस्योत्पन्नं विकर्मानि अखिल मपनुदस् येव चित्त स्थितस् त्वं
तन्मे पापोत्थ तापान् पवनपुरपते रुंधि भक्तिं प्रणीयाः ॥ ॥92-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥

STOTRADHWANI